श्रीनिम्बार्काचार्य विरचितम्

# जितं ते स्तोत्रम्



प्रकाशक

श्रीहरिव्यास निकुंज मन्दिर

वृन्दावन, मथुरा, उत्तरप्रदेश, भारत

श्रीनिम्बार्क सम्प्रदाय अन्तर्गत

# जितं ते स्तोत्रम्

सम्पादक

कृष्ण शरण पोखरेल 'शास्त्री'

प्रकाशक

श्रीहरिव्यास निकुंज मन्दिर

वृन्दावन, मथुरा, उत्तरप्रदेश, भारत

प्रकाशन मितिः- विवाह पंचमी, २०७६

प्रेरणास्त्रोतः- परमपूज्य गुरुदेव श्रीश्री १०८ श्रीमुरारीदास ब्रह्मचारी ज्यू महाराज

प्राप्तिस्थानः- श्रीहरिव्यास निकुंज मंदिर
वृन्दावन, मथुरा

# जितं ते स्तोत्रम्

॥अथ प्रथमोऽध्यायः॥

जितं ते पुण्डरीकाक्ष पुर्णषाड्गुण्य विग्रह ।
परानन्द परं ब्रह्मन्नमस्ते परमात्मने ॥१॥
नमस्ते पीतवसन नमः कटकहारिणे ।
नमो नीलालकाबद्धवेणोसुन्दरविग्रह ॥२॥
स्फुरद्वलयकेयूर नूपुराङ्गदभूषणैः ।
शोभनैर्भूषिताकार कल्याणगुणवारिधे ॥३॥
करुणापूर्णहृदय शंख चक्र गदाधर ।
अमृतानन्दपूर्णाभ्यां लोचनाभ्यां विलोकय ॥४॥
कृशं कृतघ्नं दुष्कर्मकारिणं पापभाजनम् ।
अपराधसहस्त्राणामाकर करुणाकर ॥५॥
कृपया मां केवलया गृहाण मथुराधिप ।
विषयार्णवमग्नंमामुद्धर्तुं त्वमिहार्हसि ॥६॥
पिता माता सुहृद्बन्धुर्भ्राता पुत्रस्त्वमेव हि ।
विद्या धनं च कामश्चानान्यत्किञ्चित्त्वया विना ॥७॥
यत्र कुत्र कुले वासो येषु केषु भवोऽस्तु मे ।
तव दास्यैकभावे स्यात्सदा सर्वत्र मे रतिः ॥८॥
मनसा कर्मणा वाचा शिरसा वा कथञ्चन ।
त्वां विना नान्यमुद्दिश्य करिष्ये किञ्चिदप्यहम् ॥९॥
पाहि पहि जगन्नाथ कृपया भक्तवत्सल ।

अनाथोऽहमधन्योऽहमकृतार्थो ह्यकिञ्चन ॥१०॥
नृशंसः पापकृत्क्रूरो वञ्चको निष्ठुरः सदा।
भवार्णवनिमग्नं मामनन्य करुणोदधे ॥११॥
करुणापूर्णदृष्टिभ्यां दीनं मामवलोकय।
त्वदग्रे पतितं त्यक्तुं तावकं नार्हसि प्रभो॥१२॥
मया कृतानि पापानि त्रिविधानि पुनः पुनः।
त्वत्पादपंकजं प्राप्तुं नान्यत्त्वत्करुणां विना॥१३॥
साधनानि प्रसिद्धानि यागादीन्यब्जलोचन ।
त्वदाज्ञया प्रयुक्तानि त्वामुद्दिश्य कृतानि वै॥१४॥
भक्त्यैकलभ्यः पुरुषोत्तमोऽसौ
जगत्प्रसूतिस्थितिनाशहेतुः ।
अकिंचनोऽनन्यगतिः शरण्यं
गृहाण मां क्लेशिनमम्बुजाक्ष ॥१५॥
धर्मार्थकाममोक्षेषु नेच्छा मम कदाचन।
त्वत्पादङ्कजं साधो जीवितं दीयतां मम ॥१६॥
कामये तावकत्वेन परिचर्यानुवर्तनम् ।
नित्यकिङ्करभावेन परिगृह्णीष्व मां विभो ॥१७॥
लोकं वैकुण्ठनामानां दिव्यं षाड्गुण्यसंयुतम् ।
अवैष्णवानामप्राप्यं गुणत्रयविवर्जितम्॥१८॥
नित्यसिद्धैः समाकीर्णं तन्मयैःपाञ्चकालिकैः ।
सभा प्रासाद संयुक्तं वनैश्चोपवनैर्युतम्॥१९॥
वापीकूपतडागैश्च वृक्षखण्डैः सुमण्डितम् ।

अप्राकृतं सुरैर्वन्द्यमयुतार्क समप्रभम् ॥२०॥
प्रकृष्ट सत्त्वराशिं त्वां कदा द्रक्ष्यामि चक्षुषा ।
क्रीडंतं रमया सार्द्धं लीलाभूमिषु केशवम् ॥२१॥
मेघश्यामं विशालाक्षं कदा द्रक्ष्यामि चक्षुषा ।
उन्नसं चारुदशनं बिंबोष्ठं च शुभाननम् ॥२२॥
विशालवक्षसं श्रीशं कम्बुग्रीवं जगद्गुरुम् ।
आजानुबाहुपरिघमुन्नतांसं मधुद्विषम् ॥२३॥
तनूदरम् निम्ननाभिमापीन जघनं हरिम् ।
करभोरूं श्रियः कांतं कदा द्रक्ष्यामि चक्षुषा ॥२४॥
शंख चक्र गदा पद्मैरंकितं पादपंकजम् ।
शरच्चंद्र शताक्रान्तं नखराजि विराजितम् ॥२५॥
सुरासुरैर्वंद्यमानमृषिभि वन्दितं सदा ।
मूर्द्धानं मामकं देव तावकं मण्डयिष्यति ॥२६॥
कदा गंभीरया वाचा श्रिया युक्तो जगत्पते ।
चामरव्यग्र हस्तं मामेवं कुर्विति वक्ष्यसि ॥२७॥
कदाऽहं राजराजेन गणनाथेन चोदितः ।
चरेयं भगवत्पाद परिचर्यानुवृत्तिषु ॥२८॥
शांताय सुविशुद्धाय तेजसे परमात्मने ।
नमः सर्वगुणातीत षाड्गुण्या याति वेधसे ॥२९॥
सत्यज्ञानेष्वनन्ताय ब्रह्मणे चतुरात्मने ।
नमो भगवते विष्णो वासुदेवाऽमितद्युते ।
चतुः पञ्च नव व्यूह दशद्वादश मूर्तये ॥३०॥

नमोऽनन्ताय विश्वाय विश्वातीताय चक्रिणे ।
नमस्ते पंचकालज्ञ पंचकालपरायण ॥३१॥
पंचकालैक मनसां त्वमेव गतिरव्वयः ।
स्वमहिम्नस्थितं देवं निर्विकारं निरञ्जनम् ॥३२॥
अप्रमेयमजं विष्णु शरणं त्वांगतोऽस्म्यहम् ।
गुणातीतं परं शांतमब्जनाभं सुरेश्वरम् ॥३३॥
तुरीयाद्यतिरिक्तं त्वां कौस्तुभोद्भासिवक्षसम् ।
विश्वरूपं विशालाक्षं कदा द्रक्ष्यामि चक्षुषा ॥३४॥
मोक्षं सालोक्य सारूप्यं प्रार्थये न धराधर ।
इच्छासिद्धि महाभाग कारुण्यं तव सुब्रत ॥३५॥
सकला चरणातीतः किंकरोऽस्मि तवानघ ।
किंकरोऽस्मि पुनर्विष्णो तवाहं पुरुषोत्तम ॥३६॥
आसनाद्यनुयागांतमर्चनं यन्मया कृतम् ।
भोगहीनं क्रियाहीनं मंत्रहीनमभक्तिकम् ॥३७॥
तत्सर्वं क्षम्यतां देव दीनं मामात्मसात्कुरू ।
इति स्तोत्रेण देवेश स्तुत्वा मधुविघातिनम् ॥३८॥
यागावसान समये देव देवस्य चक्रिणः ।
नित्यं किंकरभावेन स्वात्मानम् विनिवेदयेत् ॥३९॥

*॥इति श्रीपञ्चरात्रागमे जितन्तेस्तोत्रे प्रथमोऽध्यायः॥*

॥अथ द्वितीयोऽध्यायः॥

जितं ते पुण्डरीकाक्ष नमस्ते विश्वभावन ।
नमस्तेऽस्तु हृषीकेश महापुरूष पूर्वज ॥१॥

विज्ञापनमिदं देव श्रृणु त्वं पुरुषोत्तम।
नरनारायणाभ्यां च श्वेतद्वीपनिवासिभिः॥२॥
नारदाद्यैर्मुनिगणैः सनकाद्यैश्च योगिभिः।
ब्रह्मेशाद्यैः सुरगणैः पंचकालपरायणैः॥३॥
पूज्यसे पुण्डरीकाक्ष दिव्यैर्मन्त्रैर्महात्मभिः।
पाखण्डधर्मसङ्कीर्णे भगवद्भक्तिवर्जिते॥४॥
कलौ जातोऽस्मि देवेश सर्वधर्म वहिष्कृते।
कथं त्वामसमाचरः पापप्रसवभूरहम्॥५॥
अर्चयामि दयासिन्धो पाहि मां शरणागतम्।
तापत्रय दवाग्नौ च दह्यमानं सदा विभो॥६॥
पाहि मां पुण्डरीकाक्ष केवलं कृपया तव।
जन्म मृत्यु जरा व्याधि दुःखं संतप्त देहिनम्।
पालयाशुदृशादेव तव कारुण्य गर्भया॥७॥
इन्द्रियाणि मया जेतुमशक्यं पुरुषोत्तम्।
शरीरं मम देवेश व्याधिभिः परिपीड़ितम्॥८॥
मनो मे पुण्डरीकाक्ष विषयानेव धावति।
वाणी मम हृषीकेश मिथ्या पारुष्य दूषिता॥९॥
एवं साधन हीनोऽहं किं करिष्यामि केशव।
रक्ष मां कृपया कृष्ण भवाब्धौ पतितं सदा॥१०॥
अपराध सहस्त्राणां सहस्त्रमयुतं तथा।
अर्बुदं चाप्यसंख्येयं करुणाब्धे क्षमस्व मे॥११॥
यत्रापराधं कृतयानज्ञानात्पुरुषोत्तमः।

अज्ञस्य मम देवेश तत्सर्वं क्षंतुमर्हसि ॥१२॥
अज्ञत्वादल्पशक्तित्वादालस्याद्दुष्टभावनात्।
कृतापराधं कृपणं क्षंतुमर्हसि मां विभो ॥१३॥
अपराध सहस्त्राणि क्रियंतेऽहर्निशं मया ।
तानि सर्वाणि मे देव क्षमस्व मधुसूदन ॥१४॥
यज्जन्मनः प्रभृति मोहवशं गतेन
नानापराध शतमाचरितं मया ते ।
अंतर्वहिश्च सकलं तव पश्यतोऽपि
क्षंतुं त्वमर्हसि हरे करुणावशेन ॥१५॥
कर्मणा मनसा वाचा या चेष्टा मम नित्यशः ।
केशवाराधने सा स्याज्जन्म जन्मान्तरेष्वपि ॥१६॥

*॥इति श्रीपञ्चरात्रागमे जितन्तेस्तोत्रे द्वितीयोऽध्यायः॥*

॥अथ तृतीयोऽध्यायः॥

जितं ते पुण्डरीकाक्ष नमस्ते विश्वभावन ।
नमस्तेऽस्तु हृषीकेश महापुरुषपूर्वज ॥१॥
नमस्ते वासुदेवाय शतानन्दचिदात्मने।
अध्यक्षाय स्वतन्त्राय निरपेक्षाय शाश्वते॥२॥
अच्युतायाविकाराय तेजसां निधये नमः।
क्लेशकर्माद्यसंस्पृष्टपूर्णषाड्गुण्यमूर्तये ॥३॥
त्रिभिर्ज्ञानबलैश्वर्यवीर्यशक्त्योजसां युगैः ।
त्रिगुणाय नमस्तेऽस्तु नमस्ते चतुरात्मने॥४॥
चतुः पञ्चनवव्यूहदशद्वादशमूर्तये।

प्रधानपुरुषेशाय नमस्ते चतुरात्मने ॥५॥
अनेकमूर्तये तुभ्यममूर्तायैकमूर्तये।
नारायण नमस्तेऽस्तु पुण्डरीकायतेक्षण ॥६॥
सुभ्रूललाट सुमुख सुस्मिताधरविद्रुम।
पीनवृत्तायतभुज श्रीवत्सकृतभूषण ॥७॥
तनुमध्यमहावक्ष पद्मनाभ नमोऽस्तु ते।
विलासविक्रमाक्रान्तत्रैलोक्यचरणाम्बुज ॥८॥
नमस्ते पीतवसन स्फुरन्मकरकुण्डल।
स्फुरत्किरीटकेयूरनुपुराङ्गदभूषण ॥९॥
पञ्चायुध नमस्तेऽस्तु नमस्ते पञ्चकालिक।
पञ्चकालायते क्रान्तं योगक्षेमं वह प्रभो ॥१०॥
नित्यज्ञानबलैश्वर्य भो गोपकरणाच्युत ।
नमस्ते ब्रह्मरुद्रादिलोकयात्राप्रवर्तक ॥११॥
जन्मप्रभृति दासोऽस्मि शिष्योऽस्मि तनयोऽस्मि ते ।
त्वं च स्वामी गुरुर्माता पिता च मम बान्धवः ॥१२॥
अपि त्वां भगवन् ब्रह्मशिवशक्रमहर्षयः ।
द्रष्टुं यष्टुमभिष्टोतुमद्यापीश न हीशते ॥१३॥
तापत्रयमहाग्राहभीषणे भवसागरे ।
मज्जतां नाथ नौरेषा प्रणतिस्तु त्वदर्पिता ॥१४॥
अनाथाय जगन्नाथ शरण्य शरणार्थिने।
प्रसीद सीदते मह्यं मुह्यते भक्तवत्सल ॥१५॥
मन्त्रहीनं क्रियाहीनं भक्तिहीनं यदर्चितम्।

तत्क्षन्तव्यं प्रपन्नानामपराधसहो ह्यसि ॥१६॥
सर्वेषु देशकालेषु सर्वावस्थासु चाच्युत।
किङ्करोऽस्मि हृषीकेश भूयो भूयोऽस्मि किङ्करः ॥१७॥
एकत्रिचतुरत्यन्तचेष्टायेष्टकृते सदा।
व्यक्तषाड्गुण्यतत्वाय चतुरात्मात्मने नमः ॥१८॥

*॥इति श्रीपञ्चरात्रागमे जितन्तेस्तोत्रे तृतीयोऽध्यायः॥*

## ॥अथ चतुर्थोऽध्यायः॥

जितं ते पुण्डरीकाक्ष नमस्ते विश्वभावन।
नमस्तेऽस्तु हृषीकेश महापुरुष पूर्वज॥१॥
देवानां दानवानां च सामान्यमधिदैवतम्।
सर्वदा चरणद्वन्द्वं व्रजामि शरणं तव॥२॥
एकस्त्वमस्य लोकस्य स्त्रष्टा संहारकस्तथा।
अध्यक्षश्चानुमन्ता च गुणमायासमावृतः ॥३॥
संसारसागरं घोरमनन्तक्लेशभाजनम्।
त्वामेव शरणं प्राप्य निस्तरन्ति मनीषिणः ॥४॥
न ते रूपं न चाकारो नायुधानि न चास्पदम्।
तथापि पुरुषाकारो भक्तानां त्वं प्रकाशसे॥५॥
नैव किञ्चित्परोक्षं ते प्रत्यक्षोऽसि न कस्यचित्।
नैव किञ्चिदसिद्धं ते न च सिद्धोऽसि कस्यचित्॥६॥
कार्याणां कारणं पूर्वं वचसां वाच्यमुत्तमम्।
योगिनां परमां सिद्धिं परमं ते पदं विदुः ॥७॥
अहं भीतोऽस्मि देवेश संसारेऽस्मिन्भयावहे।

पाहि मां पुण्डरीकाक्ष न जाने शरणं परम् ॥८॥
कालेष्वपि च सर्वेषु दिक्षु सर्वासु चाच्युत।
शरीरे च गतो चापि वर्तते मे महद्भयम् ॥९॥
त्वत्पादकमलादन्य न मे जन्मान्तरेष्वपि।
निमित्तं कुशलस्यास्ति येन गच्छामि सद्गतिम् ॥१०॥
विज्ञानं यदिदं प्राप्तं यदिदं ज्ञानमर्जितम् ।
जन्मान्तरेऽपि मे देव माभूत्तस्य परिक्षयः ॥११॥
दुर्गतावपि जातायां त्वद्गतो मे मनोरथः।
यदि नाशं नु विन्देत तावतास्मि कृती सदा ॥१२॥
न कामकलुषं चित्तं मम ते पादयोः स्थितम्।
कामये वैष्णवत्वं च सर्वं जन्मसु केवलम् ॥१३॥
अज्ञानादथवा ज्ञानादशुभं यत्कृतं मया।
क्षन्तुमर्हसि देवेश दास्येन च गृहाण माम् ॥१४॥
सर्वेषु देशकालेषु सर्वावस्थासु चाच्युत।
किङ्करोऽस्मि हृषीकेश भूयोभूयोऽस्मि किङ्करः ॥१५॥
इत्येवमनसा स्तुत्या स्तुत्वा देवं दिने दिने।
किङ्करोऽस्मीति चात्मानं देवाय विनिवेदयेत् ॥१६॥
यच्चापराधं कृतवानज्ञानात् पुरुषोत्तम ।
अज्ञस्य मम देवेश तत्सर्वं क्षन्तुमर्हसि ॥१७॥
अहंकारार्थं कामेषु प्रीतिरद्यैव नश्यतु ।
त्वां प्रपन्नस्य मे देव वर्द्धतां श्रीपति त्वयि ॥१८॥
क्वाहमत्यन्तदुर्बुद्धिः क्वानुचात्महितेक्षणम् ।

यद्भिन्नं मम देवेश तदा ज्ञापय माधव ॥१९॥
सोऽहं ते देवदेवेश नार्चनादौ स्तुतौ न च।
सामर्थ्यवान् कृपामात्र मनोवृत्तिः प्रसीद मे ॥२०॥
उपचारापदेशेन क्रियन्तेऽहर्निशं मया।
अपचारानि तान् सर्वान् क्षमस्व पुरुषोत्तम ॥२१॥
न जाने कर्म यत्किञ्चिन्नापि लौकिक वैदिकौ।
न निषेधविधीविष्णो तव दासोऽस्मि केवलम् ॥२२॥
स त्वं प्रसीद भगवन् कुरुमय्यनाथे
विष्णो कृपां परमकारुणिकः किल त्वम्।
संसारसागरनिमग्नमनन्तदीन-
मुद्धर्तुमर्हसि हरे करुणावशेन ॥२३॥

*॥इति श्रीपञ्चरात्रागमे जितन्तेस्तोत्रे चतुर्थोऽध्यायः॥*

## ॥अथ पंचमोऽध्यायः॥

जितन्ते पुण्डरीकाक्ष नमस्ते विश्वभावन।
नमस्तेऽतु हृषीकेश महापुरुषपूर्वज ॥१॥
नमस्ते वासुदेवाय शान्तानन्दचिदात्मने।
अजिताय नमस्तुभ्यं षाड्गुण्य निधये नमः ॥२॥
महाविभूतिसंस्थाय नमस्ते पुरुषोत्तम।
सहस्त्रशिरसे तुभ्यं सहस्त्रचरणायते ॥३॥
सहस्त्रबाहवे तुभ्यं सहस्त्रनयनायते।
अमूर्तये नमस्तुभ्यमेकमूर्तायते नमः ॥४॥
अनेकमूर्तये तुभ्यमक्षराय च ते नमः।

व्यापिने वेदवेद्याय नमस्ते परमात्मने ॥५॥
चिन्मात्ररूपिणे तुभ्यं नमस्तुर्यादिमूर्तये ।
अणिष्ठायस्थविष्ठाय महिष्ठाय च ते नमः ॥६॥
वरिष्ठाय विशिष्टाय कनिष्ठाय नमोनमः ।
नेदिष्ठापदविष्ठाय क्षेपिष्ठाय च ते नमः ॥७॥
पञ्चात्मने नमस्तुभ्यं सर्वान्तर्यामिणे नमः ।
कलाषोडशरूपाय सृष्टिस्थित्यन्तहेतवे ॥८॥
नमस्ते गुणरूपाय गुणरूपनिवर्तिने ।
व्यस्ताय च समस्ताय समस्तव्यस्तरूपिणे ॥९॥
आदिमध्यान्तशून्याय तद्वते च नमो नमः ।
प्रणवप्रतिपाद्याय नमः प्रणवरूपिणे ॥१०॥
लोकयात्राप्रसिद्ध्यर्थं सृष्टब्रह्मादिरूपिणे ।
नमस्तुभ्यं नृसिंहादिमूर्तिभेदाय विष्णवे ॥११॥
विपाकैः कर्मभिक्लेशैरस्पृष्टवपुषे नमः ।
नमो ब्रह्मण्यदेवाय तेजसां निधये नमः ॥१२॥
नित्यसाधारणानेक लोकरक्षा परिच्छदे ।
सच्चिदानन्दरूपाय वरेण्याय नमो नमः ॥१३॥
यजमानाय यज्ञाय यष्टव्याय नमो नमः ।
इज्याफलात्मने तुभ्यं नमः स्वाध्यायशालिने ॥१४॥
नमः परमहंसाय नमः सत्वगुणाय ते ।
स्थिताय परमे व्योम्नि भूयो भूयो नमो नमः ॥१५॥
हरिर्देह भूतामात्मा परः प्रकृतिरीश्वरः ।

त्वत्पाद मूलं शरणं यतः क्षेमो नृणामिह ॥१६॥
संसारसागरे घोरे विषयावर्तसङ्कुले ।
अपारे दुस्तरेऽगाधे पतितं कर्मभिः स्वकैः ॥१७॥
अनाथमगतिं भीरूं कृपया परया हरे ।
मामुद्धर दयासिन्धो सिन्धोरस्मात्सुदुस्तरात् ॥१८॥
मन्त्रहीनं क्रियाहीनं भक्तिहीनं यदर्चितम् ।
तत्क्षन्तव्यं प्रपन्नानामपराध सहोऽह्यसि ॥१९॥
अपराधसहस्त्रभाजनं पतितं भीमभवार्णवोदरे ।
अगतिं शरणागतं हरे कृपया केवलामात्मसात् कुरु ॥२०॥
जन्मप्रभृतिदासोऽस्मि शिष्योऽस्मि तनयोऽस्मि ते ।
त्वं च स्वामी गुरुर्माता पिता च मम माधव ॥२१॥
नाहं ही त्वां प्रजानामि त्वांभजाम्येव केवलम् ।
बुध्वैवं मम गोविन्द ह्यन्तुपानय मां हरे ॥२२॥
त्वां विनान्य प्रियो नो मेनेदं नेदमितीति च ।
बुद्धिं नीतिं च मे देहि येन त्वामुपयाम्यहम् ॥२३॥
इति विज्ञाप्य देवेशं वैश्वदेवं स्वधामनि ।
कुर्यात्पञ्चमहायज्ञा नापि गृह्योक्तवर्त्मना ॥२४॥
इत्यादि समये तस्य कथितः कमलासनः ।
वेदानां सारमुद्धृत्य सर्वागमसमृद्धये ॥२५॥

*॥इति श्रीपञ्चरात्रागमे जितन्तेस्तोत्रे पञ्चमोऽध्यायः॥*

**★श्रीकृष्णार्पणमस्तु★**

# ॥अथ प्रपन्नवल्ली॥

आद्यस्याथो रमादेवीमतुपा योग उच्यते।
अनन्त गुण सम्पूर्णो देवो मुक्तिप्रदोहरिः॥१॥
चरणौन्यसनस्थानं शरणं साधनं विदुः।
सदेतिकालाविच्छेद उच्यते परमर्षिभिः॥२॥
उत्तमेन प्रपत्त्याऽणुर्ज्ञायते वेदमातृतः।
बृहद्गुणोऽहमर्थश्चातन्त्रश्च वन्धमोक्षभाक्॥३॥
प्रपत्तिश्चात्मनिक्षेपो गुरुणा परमात्मना।
सर्वसम्बन्धयुक्तेन गोप्ता वोढ्रा भरस्यहि॥४॥
वरणीयो गुरुः पूर्वं गोप्तृत्वेन मुमुक्षुभिः।
सर्व सम्बन्धवत्त्वं च श्रूयते श्रुतिनिर्णये॥५॥
मातापिता तथा भ्राता निवासः शरणं सुहृत्।
स्मरणं च महर्षीणां श्रुति नामुपवृंहणम्॥६॥
त्वमेव माता च पिता त्वमेव
त्वमेव बन्धुश्च सखा त्वमेव।
त्वमेव विद्या द्रविणं त्वमेव
त्वमेव सर्वं मम देव देव॥७॥
पिताऽसिलोकस्य चराचरस्य
त्वमस्य पूज्यश्च गुरुर्गरीयान्।
न त्वत्समश्चाभ्यधिकः कुतोऽन्यो
लोकत्रयेऽप्य प्रमितप्रभावः॥८॥

तस्मात्प्रणम्य प्रणिधाय कायं
प्रसादेयत्वामहमीशमीड्यम् ।
पितेव पुत्रस्य सखेव सख्युः
प्रियः प्रियायार्हसि देवसोढुम् ॥९॥
आत्मनिक्षेपणं तत्वसर्वाङ्गैः सह प्रोच्यते ।
आनुकूल्यस्य संकल्पः प्रातिकूलस्य वर्जनम् ॥१०॥
रक्ष्यष्यतीतिविश्वासो गोप्तृत्ववरणं तथा ।
पंचमं कृपणत्वं च पञ्चरात्रविदोविदुः ॥११॥
अत्रमानं च योगीतश्चरमे भवता स्वयम् ।
सर्वधर्मानिति श्लोको गुह्याद्गुह्यतमो महान् ॥१२॥
श्रीरामोऽपि स्वयं प्राह सुग्रीवादि सभासदाम् ।
वानराणां विवादेहि जाते कौतूहले तदा ॥१३॥
सकृदेव प्रपन्नाय तवास्मीति च याचते ।
अभयं सर्वभूतेभ्यो ददाम्येतद् व्रतं मम ॥१४॥
मित्र भावेन सम्प्राप्तं न त्यजेयं कथञ्चन ।
दोषो यद्यपि तस्यस्यात्सतामेतद्विगर्हितम् ॥१५॥
मन्त्रोऽप्यत्र प्रमाणं हि विद्यते श्रुति निर्णये ।
श्वेताश्वतरसन्दर्भे वचनं च प्रसिद्धितः ॥१६॥
यो ब्रह्माणं विदधाति पूर्वं
यो वा वेदांश्च प्रहिणोति तस्मै ।
तदहंदेवमात्मबुद्धिप्रकाशं
मुमुक्षुर्वै शरणमहं प्रपद्ये ॥१७॥

ततश्चगुरुणाऽऽत्मानमात्मसात्कारयेद्बुधः ।
तस्य सम्बन्धविषयो भूत्वा सेवेत नित्यशः ॥१८॥
अथात्मनो विनिक्षेप आत्मीयैः सहकर्मभिः ।
ज्ञानैश्च विष्णो कर्त्तव्यो मनोबुद्ध्यादिभिस्तथा ॥१९॥
पुत्रमित्र कलत्राद्यै रोज्यन्ते प्रति योगिनः ।
तद्वत्सर्वात्मभावेन शिष्यः सेवेत सद्गुरुम् ॥२०॥
आत्माऽऽमीयत्व सम्बन्ध एतावान्वर्ण्यते बुधैः ।
गुरोरात्मादिकं यत्तत् पृथक् नेक्षेत कञ्चन ॥२१॥
एवं तद्भावमापन्नस्तदाऽसौ सर्वभावतः ।
भगवद्भावमाप्नोति पुनरावृत्तिवर्जितः ॥२२॥
अनुबन्धा तस्य मनोः प्रकीर्त्यन्ते मनीषिभिः ।
वात्सल्यादि गुणैर्युक्तः सर्वज्ञो मुक्तिदो हरिः ॥२३॥
प्रथमाऽर्थो रमाकान्तो विषयश्चात्र भाव्यते ।
अकिञ्चनोऽनन्यगतिः सर्वसाधनवर्जितः ॥२४॥
कार्पण्यादि समायुक्तोऽधिकारी परिगीयते ।
आचार्य देवो विषये विरक्तस्तत्वचिन्तकः ॥२५॥
प्रयोजनं चात्र भगवद्भावप्तर्हि लक्षणम् ।
वाच्यवाचक सम्बन्धो विज्ञातव्यो मनीषिभिः ॥२६॥
एवं गुरोः प्रेष्ठतमो ह्यात्मन्यासो दृढव्रतः ।
सर्वबन्धविनिर्मुक्तः सायुज्यमधिगच्छति ॥२७॥

*॥ हरिॐतत्सदिति श्रीरहस्यमीमांसायां प्रपन्नकल्पवल्ल्यां*
*शरणागतिम् व्याख्यारहस्यं सम्पूर्णम् ॥*

★श्रीकृष्णार्पणमस्तु★

# मन्त्र रहस्य षोडशी

श्रीमद्धंसंप्रणम्याथ कुमारान्नारदं मुनिम्।
ब्रह्मविद्यां प्रवक्ष्यामि गुह्याद्गुह्यां सनातनीम् ॥१॥
यां प्राप्य साधवः पूर्वे भगवद्भावमागताः।
तस्मात्सर्वात्मभावेन धारणीया मुमुक्षुभिः॥२॥
अकारार्थो हरिः प्रोक्तो मध्यमार्थो गुरुस्तथा।
मकारार्थो जीवज्ञातो विज्ञेयो वैष्णवोत्तमैः॥३॥
तथैवः क्लर्थः कृष्णः स्याद्धितीयो गमयिता गुरुः।
चरमार्थञ्च क्षेत्रज्ञ इति शास्त्रानुशासनम् ॥४॥
यद्वदागम बीजस्य सामान्या गतिरीरिता ।
तथैव बीजमंत्रस्य ज्ञातव्या हि मुमुक्षुभिः॥५॥
मंगलायाप्यखण्डार्थः शास्त्रारम्भे प्रकीर्त्यते।
भगवन्नामधेयत्वात् प्रोच्यते च महर्षिभिः॥६॥
ॐ तत्सदिति निर्देशो ब्रह्मणा त्रिविध स्मृतः।
ओमित्येकाक्षरं ब्रह्मेत्युक्तेरर्जुनसारथे॥७॥
चरमार्थं हविः कृत्वा मध्यमं चार्पणं तथा ।
प्रथमार्थे च ब्रह्माग्नावात्मानं जुहूयाद् बुधः॥८॥
हुत्वात्मानं बुधश्चैवं कृतकृत्योऽभिजायते।
भवबन्ध विनिर्मुक्तो ब्रह्मसायुज्यमाप्नुयात्॥९॥
एतस्यैव हि मन्त्रस्य शिष्टं विवरणं स्मृतम्।
तेषु क्लर्थश्च व्याख्यातो द्वाभ्यां पद्भ्यां बुधोत्तमैः॥१०॥

सलक्षणप्रमाणाभ्यां स्वरूपगुणशक्तिभिः।
एकेन चरमार्थश्च गुरुणा योग उच्यते॥११॥
चरमेणात्महोमस्य विधानम् परिकीर्तितम्।
अनेनैवास्य शास्त्रस्य ह्यनुबन्धाः प्रकीर्तिता॥१२॥
गुर्वर्थं यस्य प्राणादि यौवनं धनमेव च।
आत्मात्मीयेषु निर्विण्णोऽधिकारी सम्यगीर्यते॥१३॥
विषयः प्रथमार्थः स्यात्तद्भावापत्ति लक्षणम्।
श्रेयः प्रयोजन ज्ञेयं ज्ञाप्यज्ञापकयोगता॥१४॥
आदौ गुरौ न्यसेत्प्राणानात्मानं धनमेव च।
सर्व सम्बन्धविषयं कृत्वा सेवेत नित्यशः॥१५॥
देहेन्द्रिय मनः प्राणैर्मायां हित्वा समाहितः।
भृत्यवत्पुत्रवत्सेवेत् प्रियवन्मित्रवत्तथा॥१६॥
या देया गुरुणा विद्या भवसम्बन्धध्वंसिनी।
तां तदुक्तेन मार्गेण धारयेद् वैष्णवोत्तमः॥१७॥
इति गुह्यतमं मन्त्रं रहस्यं साधुसत्तमैः।
ऋते शिष्यान्न देयं तु चानुष्ठेयं गुरुयोगतः॥१८॥

*॥इति श्रीमन्त्ररहस्य षोडशीं संपूर्ण॥*

★श्रीकृष्णार्पणमस्तु★

# श्रीराधिकाष्टकम्

नमस्ते श्रियै राधिकायै परायै
नमस्ते नमस्ते मुकुन्दप्रियायै।

सदानन्दरूपे प्रसीद त्वमन्तः
प्रकाशे स्फुरन्ती मुकुन्देन सार्धम ॥१॥
स्ववासोपहारं यशोदासुतं वा
स्वदध्यादिचौरं समाराधयन्तीम् ।
स्वदाम्नोदरे या बबन्धाशु नीव्या
प्रपद्ये नु दामोदरप्रेयसीं ताम् ॥२॥
दुराराध्यमाराध्य कृष्णं वशे तं
महाप्रेमपूरेण राधाभिधाभूः ।
स्वयं नामकीर्त्या हरौ प्रेम यच्छत्
प्रपन्नाय मे कृष्णरूपे समक्षम् ॥३॥
मुकुन्दस्त्वया प्रेमडोरेण बद्धः
पतङ्गो यथा त्वामनुभ्राम्यमाणः ।
उपक्रीडयन् हार्दमेवानुगच्छन्
कृपावर्तते कारयतो मयीष्टिम् ॥४॥
व्रजन्तिं स्ववृन्दावने नित्यकालं
मुकुन्देन साकं विधायाङ्कमालाम् ।
समामोक्ष्यमाणानुकम्पाकटाक्षैः
श्रियं चिन्तये सच्चिदानन्दरूपाम् ॥५॥
मुकुन्दानुरागेण रोमाञ्चिताङ्गै-
रहं वेप्यमानां तनुस्वेदबिन्दुम् ।
महाहार्दवृष्ट्या कृपापाङ्गदृष्ट्या
समालोकयन्तीं कदा त्वां विचक्षे ॥६॥

यदङ्कावलोके महालालसौघं
मुकुन्दः करोति स्वयं ध्येयपादः ।
पदं राधिके ते सदा दर्शयान्त
हृदिस्थं नमन्तं किरद्रौचिषं माम् ॥७॥

सदा राधिकानाम जिह्वाग्रतः स्यात् -
सदा राधिकारूपमक्ष्यग्रामास्ताम् ।
श्रुतौ राधिकाकीर्तिरन्तःस्वभावे -
गुणा राधिकायाः श्रिया एतदीहे ॥८॥

इदं त्वष्टकं राधिकायाः प्रियायाः
पठेयुः सदैवं हि दामोदरस्य ।
सुतिष्ठन्ति वृन्दावने कृष्णधाम्नि
सखीमूर्तयो युग्मसेवानुकूलाः ॥९॥

॥ इति श्रीनिम्बार्काचार्य विरचितं राधिकाष्टकम् सम्पूर्णम् ॥

★श्रीकृष्णार्पणमस्तु★

# प्रातः स्मरण-स्तोत्रम्

प्रातः स्मरामि युगकेलि रसाभिषिक्तं
वृन्दावनं सुरमणीयमुदार वृक्षम् ।
सौरीप्रवाहवृतमात्मगुणप्रकाशं
युग्मांघ्रिरेणुकणिकाञ्चितसर्वसत्त्वम् ॥

प्रातःस्मरामि दधिघोषविनित निद्रं
निद्रावसानरमणीयमुखानुरागम् ।

उन्निद्रपद्मनयनं नवनीरदाभं

हृद्यानवद्यललनाञ्चितवामभागम् ॥

प्रातर्भजामि शयनोत्थितयुग्मरूपं

सर्वेश्वरं सुखकरंरसिकेशभूपम् ।

अन्योन्यकेलिरसचिह्नसखीदृगौघं

सख्यावृतं सुरतकाममनोहरं च ॥

प्रातर्भजेसुरतसारपयोधिचिह्नं

गण्डस्थलेन नयनेन च सन्दधानौ ।

रत्याद्यशेषशुभदौ समुपेतकामौ

श्रीराधिकावरपुरन्दरपुण्यपुञ्जौ ॥

प्रातर्धरामि हृदयेन हृदीक्षणीयं

युग्मस्वरूपमनिषं सुमनोहरं च ।

लावण्यधाम ललना भिरूपेयमान-

मुत्थाप्यमानमनुमेयमशेषवेषैः ॥

प्रातर्ब्रवीमि युगलावपि सोमराजौ

राधामुकुन्दपशुपालसुतौ वरिष्ठौ ।

गोविन्दचन्द्रवृषभानुसुतौ वरिष्ठौ

सर्वेश्वरौ स्वजनपालनतत्परेशौ ॥

प्रातर्नमामि युगलांघ्रिसरोजकोश-

मष्टाङ्गयुक्तवपुषा भवदुःखदारम् ।

वृदावने सुविचरन्तमुदारचिह्नं

लक्ष्म्या उरोजधृतकुंकुमरागपुष्टम् ॥

प्रातनर्मामि वृषभानुसुतापदाब्जं
नेत्रालिभिः परिणुतं व्रजसुन्दरीणाम् ।
प्रेमातुरेण हरिणा सुविशारदेन,
श्रीमद्व्रजेशतनयेन सदाऽभिवन्द्यम् ॥
सञ्चिन्तनीयमनुमृग्यमभीष्टदौहं,
संसारतापशमनं चरणं महार्हम् ।
नन्दात्मजस्य सततं मनसागिरा च,
संसेवयामि वपुषा प्रणयेन रम्यम् ॥
प्रातः स्तवमिमं पुण्यं प्रातः रुत्थाय यः पठेत् ।
सर्वकालं क्रियास्तस्य सफलाः स्युः सदा ध्रुवाः ॥
॥इति प्रातःस्मरण–स्तोत्र॥
★श्रीकृष्णार्पणमस्तु★

# वेदान्त दशश्लोकी

ज्ञानस्वरुपञ्च हरेरधिनं शरीरसंयोगवियोगयोग्यम् ।
अणुं हि जीवं प्रतिदेहभिन्नं ज्ञातृत्ववन्तं यदनन्तमाहुः ॥१॥
अनादि माया परियुक्तरूपं त्वेनं विदुर्वै भगवत्प्रसादात् ।
मुक्तञ्च बद्धं किलबद्धमुक्तं प्रभेदबाहुल्यमथापिबोध्यम् ॥२॥
अप्राकृतं प्राकृतरूपकञ्च कालस्वरूपं तदचेतनं मतम् ।
मायाप्रधानादिपदप्रवाच्यम् शुक्लादिभेदाश्च समेऽपि तत्र ॥३॥
स्वभावतोऽपास्तसमस्तदोषमशेषकल्याणगुणैकराशिम् ।
व्यूहाङ्गिनं ब्रह्म परंवरेण्यं ध्यायेम कृष्णं कमलेक्षणं हरिम् ॥४॥

अङ्गेतुवामे वृषभानुजां मुदा विराजमानमनरूपसौभगाम् ।
सखीसहस्त्रैः परिसेवितां सदा स्मरेमदेवीं सकलेष्टकामदाम्॥५ ॥
उपासनीयं नितरां जनैः सदा प्रहाणयज्ञानतमोनुवृत्तेः ।
सनन्दनाद्यैर्मुनिभिस्तथोक्तं श्रीनारदायाखिलतत्त्वसाक्षिणे॥६ ॥
सर्वं हि विज्ञानमतोयथार्थकं श्रुतिस्मृतिभ्यो निखिलस्यवस्तुनः ।
ब्रह्मात्मकत्वादितिवेदविन्मतं त्रिरूपताऽपिश्रुतिसूत्रसाधिता॥७ ॥
नान्यागतिः कृष्णपदारविन्दात् संदृष्यते ब्रह्मशिवादिवन्दितात्।
भक्तेच्छयोपात्तसुचिन्त्यविग्रहादचिन्त्यशक्तेरविचिन्त्यसाशयात्॥८ ॥
कृपास्य दैन्यादियुजि प्रजायते यया भवेत्प्रेम विशेष लक्षणाः ।
भक्तिर्ह्यनन्याधिपतेर्महात्मनः साचोत्तमासाधनरूपिकाऽपरा॥९ ॥
उपास्यरूपं तदुपासकस्य च कृपाफलं भक्तिरसस्ततःपरम् ।
विरोधिनोरूपमथैतदाप्तेर्ज्ञेया इमेऽर्था अपि पञ्च साधुभिः॥१० ॥

॥इति वेदान्त दशश्लोकी॥

★श्रीकृष्णार्पणमस्तु★

# श्रीकृष्ण-स्तवराज

शान्तिकान्तिगुणमन्दिरं हरिं स्थेमसृष्टिलयमोक्षकारणम्।
व्यापिनं परमसत्यमशिनं नौमि नन्दगृहचन्दिनं प्रभुम्॥१ ॥
निर्गुणं तदिति वैदिकं वचोऽविद्यया त्वयिविशेषणाऽसहे।
वस्तुतोऽखिलविशेषसागरे नो विरुद्धमिति तावदस्तु मे॥२ ॥
त्वत्समो यदिह नास्ति चेतनः कस्तदाधिकगुणाकरः प्रभुः।
त्वां प्रयामि शरणं शरण्यकं पुण्डरीकनयनं सुधानिधिम्॥३ ॥
त्वां विशिष्टगुणमात्मसुप्रियं दर्शनीयमुखपंकजश्रियम्।

स्पर्शनीयतनुवल्लराश्रियं सेवनीयपदपङ्कजद्वयम् ॥४॥
ब्रह्मरुद्रसुररास्वर्चितं पर्चितञ्च रमयाङ्कमालया।
चर्चितञ्च नवगोपबालया प्रेमभक्तिरसशालिमालया॥५॥
किञ्च किञ्चिदिहविद्यते न हि त्वां विनाऽण्वपि तथाऽऽखिलेश्वर।
नेति नेति च निषेधिताश्रयस्तद्विशेषविषयेऽपि सम्मतः॥६॥
त्वय्यणुत्वसुमहत्त्वभागिनि सर्वशक्तिबलयोगशालिनि।
भक्तिरस्तु मम निश्चला हरे कृष्ण केशव महत्तमाश्रये॥७॥
तत्त्वमादिपदवाच्यविष्णवे जिष्णवेऽणखिलगुरो भविष्णवे।
आत्मनां यमयते प्रतेजसे नौमि ते मधुरिपो महौजसे॥८॥
ब्रह्मणो भवत आदिपूरुषात् जायते यत इदं रमेश्वरात्।
तन्नियामकतया तदात्मकं विश्वेमेवतमखिलं प्रचक्षते॥९॥
जन्मकर्मगुणरूपयौवनं दिव्यमेव कवयो वदन्ति हि।
श्रौतवाद उपलभ्यते तथा निर्विशेषचिति मंगलालये॥१०॥
नित्यमुक्तजनतासुसेवितो बद्धजीवदययाऽक्षिगोचरः।
देशकालगुणवस्तुतो बृहद् बल्लवीप्रिय भवानमायया॥११॥
भाति चातिनिरुपाधिपद्धतिर्भक्तकामपरिपूरको विभुः।
व्यापकोऽपि परिछिन्नहृद्गतोऽचिन्त्यशक्तिरनबोधवारिधे॥१२॥
आत्मभावमनुभूतिरूपिणो ये वदन्ति तव रूपरूपिणः।
ब्रह्मभावपरमात्मभावतः सत्यमेव सुखबोधरूपिणः॥१३॥
त्वामखण्डरसमात्मवल्लभं वेदवाक्यमत एव बोधयत्।
पर्य्यवस्यति परेऽखिलात्मनि त्वय्यनन्त सुख रुप शोधयत्॥१४॥
वेदविद्भिरभिधीयते पशुर्योऽन्यदेवसमुपासको हि सः।

त्वामुपास्य बहवोऽमृताः वृताः पूर्णकाममममृतं निरंहसः ॥१५॥
नेष्टसिद्धिरपि च व्यवस्थया नादृतेश चरणा यतो हरे।
युक्तिरेव शिथिला हि तन्मते सत्तयाऽपि न हि मानदो विभुः ॥१६॥
पारशून्य परधाम तेऽद्भुतं चिद्घनं जयति लोकमूर्द्धनि।
व्यापकं च परिखा सरिद्वराऽचिन्त्यशक्ति नवमङ्गलध्वनि ॥१७॥
सत्प्रसङ्गबललभ्यभक्तितो लभ्य एव रसमूर्त्तिमान् भवान्।
सन्मुखा ननु भवन्ति ये न ते ते नियन्ति निरयान्विपद्गणान् ॥१८॥
अक्षमेव सवलं प्रमाणतो यद्यपीह कथयन्त्यपूर्वजाः।
त्वत्स्वरूपगुणवर्णने विभो वाक्यमेव सबलं प्रतीयते ॥१९॥
एकधा च बहुधा प्रदृश्यते यत्र यत्र तव विम्बमात्मनः।
उत्तमश्च खलु भाग्यवत्सु सः सोऽपियुक्ततम एव सद्वरः ॥२०॥
द्वयं शताऽपि न च भाति चेतनेऽहम्प्रतीतिविषयेऽहमर्थके।
त्वच्छरीरमितिहेतुवर्णनान्मन्य आत्मपरिशीलने कुतः ॥२१॥
दृष्टिसृष्टिरपि नैव सम्मता दर्शनात्तव फलं यतः स्थिरम्।
सार्थको भवति यत्र शब्दकः सर्व एव परदेवताऽऽत्मनि ॥२२॥
नाश्रयो न विषयो भवान् यतोऽज्ञानतोऽपि करुणानिधे तव।
सत्स्वरूपमत आमनन्ति हि विग्रहं परममङ्गलं परम् ॥२३॥
ध्यानमङ्गमिति यन्मतान्तरं तन्न युक्तमत एव माधव।
यद्यपि श्रवणतोऽपवर्गदोऽङ्गं तथाऽपि सुवचं शुभं यतः ॥२४॥
प्राप्य जन्म यदि मानुषं नरः सेवते न तव पादपङ्कजम्।
धिक् च जन्म कुलमादिदेव तद् यौवनादि सकलं न शोभते ॥२५॥

॥इति श्रीकृष्णस्तवराज स्तोत्रम्॥

★श्रीकृष्णार्पणमस्तु★

